# শত্রুঘ্নকবচম্

{॥ শত্রুঘ্নকবচম্ ॥}

॥ শ্রীমদানন্দরামায়ণাংতর্গত শ্রী শত্রুঘ্ন কবচং ॥

অগস্তিরুবাচ-

অথশত্রুঘ্ন কবচং সুতীক্ষ্ণ শ্রুণু সাদরং ।

সর্বকাম প্রদং রম্যং রামসদ্ভক্তি বর্ধনং ॥ ১॥

শত্রুঘ্নং ধৃতকার্মুকং ধৃত মহা তূণীর বাণোত্তমং

পার্শ্বে শ্রীরঘুনন্দনস্য বিনযাত্বা মেস্থিতং সুন্দরং ।

রামং স্বীয় করেণ তালজলজং ধৃত্বাতিচিত্রং বরং

সূর্যাভং ব্যজনং সভাস্থিত মহংতং বিজযংতং ভজে ॥ ২॥

অস্য শ্রী শত্রুঘ্ন কবচমন্ত্রস্য অগস্তি ঋষিঃ ।

শ্রী শত্রুঘ্নো দেবতা ।

অনুষ্টুপ্ ছন্দঃ ।

সুদর্শন ইতি বীজং ।

কৈকেযী নন্দনঃ শক্তিঃ ।

শ্রীভরতানুজ ইতি কীলকং ।

ভরতমন্ত্রীত্যস্ত্রং ।

শ্রী রামদাস ইতি কবচং ।

লক্ষ্মণাংশজ ইতি মন্ত্রঃ ।

শ্রীশত্রুঘ্ন প্রীত্যর্থং সকলমনঃ

কামনাসিদ্ধ্যর্থং জপে বিনিযোগঃ ॥

অথ অঙ্গুলী ন্যাসঃ ।

ওঁ শত্রুঘ্নায অঙ্গুষ্ঠাভ্যাং নমঃ ।

ওঁ সুদর্শনায তর্জনীভ্যাং নমঃ ।

ওঁ কৈকেযীনন্দনায মধ্যমাভ্যাং নমঃ ।

ওঁ ভরতানুজায অনামিকাভ্যাং নমঃ ।

ওঁ ভরতমন্ত্রিণে কনিষ্ঠিকাভ্যাং নমঃ ।

ওঁ শ্রী রামদাসায করতল করপৃষ্ঠাভ্যাং নমঃ ॥

হৃদযাদিন্যাসঃ ॥

ওঁ শত্রুঘ্নায হৃদযায নমঃ ।

ওঁ সুদর্শনায শিরসে স্বাহা ।

ওঁ কৈকেযীনন্দনায শিকাযৈ বষট্ ।

ওঁ ভরতানুজায কবচায হুং ।

ওঁ ভরতমন্ত্রিণে নত্রত্রযায বৌষট্ ।

ওঁ শ্রী রামদাসায অস্ত্রায ফট্ ।

ওঁ লক্ষ্মণাংশজেতি দিগ্বন্ধঃ ॥

অথ ধ্যানম্ ॥

রামস্য সংস্থিতং বামে পার্শ্বে বিনয়পূর্বকং ।
কৈকেয়ীনন্দনং সৌম্যং মুকুটেনাদি রঞ্জিতং ॥ ১॥

রত্নকঙ্কণ কেয়ূর বনমালা বিরাজিতং ।
রশনা কুণ্ডলধরং রত্নহার সুনূপুরং ॥ ২॥

ব্যজনেন বীজয়ন্তং জানকী কান্তমাদরাত্ ।
রাম ন্যস্তেক্ষণম্ বীরং কৈকেয়ী তোষবর্ধনং ॥ ৩॥

দ্বিভুজং কঞ্জনয়নং দিব্যপীতাম্বরান্বিতং ।
সুভুজং সুন্দরং মেঘশ্যামলাংং সুন্দরাননং ॥ ৪॥

রামবাক্যে দত্তকর্ণং রক্ষোঘ্নং কড্গ ধারিণং ।
ধনুর্বাণধরং শ্রেষ্ঠং ধৃততূণীর মুত্তমং ॥ ৫॥

সভায়াং সংস্থিতং রম্যং কস্তূরি তিলকাঙ্কিতং ।
মকুটস্থাবতংসেন শোভিতং চ স্মিতাননং ॥ ৬॥

রবিবংশোদ্ভবং দিব্যরূপং দশরথাত্মজং ।
মধুরাবাসিনং দেবং লবণাসুরমর্দনং ॥ ৭॥

এবং ধ্যাত্বা তু শত্রুঘ্নং রামপাদেক্ষণম্ হৃদি ।

পঠনীযং বরং চেদং কবচং তস্য পাবনং ॥ ৮॥

কবচ প্রারংভঃ ॥

পূর্বেত্ববতু শত্রুঘ্নঃ পাতুযাংযে সুদর্শনঃ ।
কৈকেযী নন্দনঃ পাতু প্রতীচ্যাং সর্বদা মম ॥ ১॥

পাতূদীশ্যাং রামবন্ধুঃ পাত্বধো ভরতানুজঃ ।
রবিবংশোদ্ভবশ্চোর্ধ্বং মধ্যে দশরথাত্মজঃ ॥ ২॥

সর্বতঃ পাতু মামত্র কৈকেযী তোষবর্ধনঃ ।
শ্যামলাঙ্গঃ চিরঃ পাতু ভালং শ্রীইলক্ষ্মণানুজঃ ॥ ৩॥

ভৃবোর্ মধ্যে সদা পাতু সুমুখোত্রাবনীতলে ।
শ্রুতকীর্তিপতির্নেত্রে কপোলে পাতু রাঘবঃ ॥ ৪॥

কর্ণৌ কুণ্ডলকর্ণোব্যাত্ নাসাগ্রং নৃপবংশজঃ ।
মুখং মম যুবা পাতু বাণীং পাতু স্ফুটাক্ষরঃ ॥ ৫॥

জিহ্বাং সুবাহুতাতোব্যাতূ্যপকেতুপিতা দ্বিজান্ ।
চিবুকং রম্যচিবুকঃ কণ্ঠং পাতু সুভাষণঃ ॥ ৬॥

স্কন্ধৌ পাতু মহাতেজাঃ ভুজৌ রাঘব বাক্যকৃত্ ।
করৌ মে কঙ্কণধরঃ পাতু খড্গী নখান্ মম ॥ ৭॥

কুক্ষিং রামপ্রিয়ঃ পাতু পাতু বক্ষো রঘূতমঃ ।
পার্শ্বে সুরার্চিতঃ পাতু পাতু পৃষ্ঠং বরাননঃ ॥ ৮॥

জঠরং পাতু রক্ষোঘ্নঃ পাতু নাভিং সুলোচনঃ ।
কটিং ভরতমন্ত্রী মে গুহ্যং শ্রী রামসেবকঃ ॥ ৯॥

রামর্পিতমনাঃ পাতু লিঙ্গমূরূ স্মিতাননঃ ।
কোদণ্ডপাণিঃ পাত্বত্র জানুনী মম সর্বদা ॥ ১০॥

রামমিত্রঃ পাতু ঝঙ্ঘে গুল্ফৌ পাতু সুনূপুরঃ ।
পাদৌ নৃপতিপূজ্যোব্যাত্ আঙ্গ্রৌ পাতু সুধার্মিকঃ ॥ ১১॥

দিবসে সত্যন্ধোব্যাত্ ভোজনে শরসৎকরঃ ।
গমনে কলকণ্ঠোব্যাত্ সর্বদা লবণান্তকঃ ॥ ১২॥

এবং শত্রুঘ্ন কবচং মযা তে সমুদীরিতং ।
যে পঠন্তি নরাস্বেতত্ তে নরাঃ সৌখ্য ভাগিনঃ ॥ ১৩॥

শত্রুঘ্নস্য বরং চেদং কবচং মঙ্গলপ্রদং ।

পঠনীযং নরৈর্ভক্ত্যা পুত্রপৌত্র বিবর্ধনং ॥ ১৪॥

অস্য স্তোত্রস্য পঠেন যং যং কামং নরোর্থযেত্ ।
তং তং লভেন্নিশ্চযেন সত্যমেতদ্ বচো মম ॥ ১৫॥

পুত্রার্থী প্রাপ্নুযাত্ পুত্রং ধনার্থী ধনমাপ্নুযাত্ ।
ইচ্ছা কামং তু কামার্থী প্রাপ্নুযাত্ পঠনাদিনা ।
কবচস্যাস্য ভূম্যা হি শত্রুঘ্নস্য বিনিশ্চযাত্ ॥ ১৬॥

তস্মাদেতত্ সদা ভক্ত্যা পঠনীযং নরৈঃ শুভং ।
আদৌ নরৈর্মারুতেশ্চ পঠিত্বা কবচং শুভং ॥ ১৭॥

ততঃ শত্রুঘ্ন কবচং পঠনীযমিদং শুভং ।
পঠনীযং ভ্রতস্য কবচং পরমং ততঃ ॥ ১৮॥

ইতি শ্রী শতকোটিরামচরিতাংতর্গত শ্রীমদানন্দরামাযণে
বাল্মিকীযে মনোহরকাণ্ডে শ্রী শত্রুঘ্নকবচং সম্পূর্ণং ॥

Encoded and proofread by Antaratma antaratma at Safe-mail.net

Please send corrections to sanskrit@cheerful.com

Last updated ৃoday

http://sanskritdocuments.org

Shatrugna Kavacham Lyrics in Bengali PDF
% File name : shatrughnakavachaAnanda.itx
% Category : kavacha
% Location : doc_raama
% Author : Valmiki
% Language : Sanskrit
% Subject : Hinduism/religion/traditional
% Transliterated by : Antaratma antaratma at Safe-mail.net
% Proofread by : Antaratma antaratma at Safe-mail.net
% Description-comments : from Anandaramayana
% Latest update : July 4, 2006
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website